# Shri Sharadastotram 2

# શ્રીશારદાસ્તોત્રમ્ ૨

## Document Information

Text title : shAradAstotram 2

File name : shAradAstotram2.itx

Category : devii, sarasvatI, jaina, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD

Description/comments : from Gujarati book mahAlakShmIshAradApUjana

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શ્રીશારદાસ્તોત્રમ્ ૨

વાગ્દેવતે ! ભક્તિમતાં સ્વશક્તિકલાપવિત્રા સિતવિગ્રહા મે ।
બોધં વિશુદ્ધં ભવતી વિધત્તાં કલાપવિત્રા સિતવિગ્રહા મે ॥ ૧॥

અઙ્કુપ્રવીણા કલહંસપત્રા કૃતસ્મરેણાનમતાં નિહન્તુમ્ ।
અઙ્કુપ્રવિણા કલહંસપત્રા સરસ્વતી શશ્વદપોહતાં વઃ ॥ ૨॥

બ્રાહ્મિ વિજેષાશ્ચ વિનિન્દ્રકુન્દપ્રભાવદાતા ઘનગર્જિતસ્ય !
સ્વરેણ જૈત્રી ઋતુના સ્વકીય પ્રભાવદાતા ઘનર્ગર્જિતસ્ય ॥ ૩॥

મુક્તાક્ષમાલાલસદૌષધીશાઽભિશૂજજવલા ભાતિ કરે ત્વદીયે ।
મુક્તાક્ષમાલાલસદૌષધીશા યાં પ્રેક્ષ્ય ભેજે મુનયોઽપિ હર્ષમ્ ॥ ૪॥

જ્ઞાનં પ્રદાતું પ્રવણા મમાતિશયાલુનાનાભવપાતકાનિ ।
ત્વં નેમુષાં ભારતિ ! પુણ્ડરીકશયાલુ નાનાભવપાતકાનિ ॥ ૫॥

પ્રૌઢપ્રભાવાસમપુસ્તકેનઃ ધાતાઽસિ યેનામ્બ ! વિરાજિહસ્તા ।
પ્રૌઢપ્રભાવાસમપુસ્તકેન વિદ્યાસુધાપૂરમદૂરદુઃખા ॥ ૬॥

તુભ્યં પ્રણામઃ ક્રિયતે ન યેન મરાલયેન પ્રમદેન માતઃ ।
કીર્તિ પ્રતાપૌ ભુવિ તસ્ય નમ્રમરાલયેન પ્રમદેન માતઃ ॥ ૭॥

રૂચ્ચારવિન્દભ્રમદં કરોતિ, વેલં યદીયોઽર્ચતિ તેઽઙ્ઘ્રિયુગ્મમ્ ।
રૂચ્ચારવિન્દભ્રમદં કરોતિ સ સ્વસ્થ ગોષ્ઠીં વિદૂષાં પ્રવિશ્ય ॥ ૮॥

પાદપ્રસાદાત્ વદ્રવ રૂપ-સમ્પત્લેખાભિરામોદિતમાનવેશઃ ।
ભવેન્નરઃ સૂક્તિભિરમ્બ ! ચિત્રોલ્લેખાભિરામોદિતમાનવેશઃ ॥ ૯॥

સિતાંશુકાન્તે નયનાભિરામામૂર્તિ સમારાધ્ય ભવેન્મનુષ્યઃ ।
સિતાંશુકાનન્તે નયનાભિરામાન્ધકારસૂર્યઃ ક્ષિતિપાવતંસઃ ॥ ૧૦॥

યેન સ્થિતં ત્વામનુ સર્વતીર્થ્યૈઃ સભાજિતા માનતમસ્તકેન ।
દુર્વાદિનાં નિર્દલિતં નરેન્દ્રસભાજિતા માનતમસ્તકેન ॥ ૧૧॥

સર્વજ્ઞવક્ત્રવરમારસાઙ્કુલીના
　　માલિં દધતી પ્રણયમન્થરયા દશૈવ ।
સર્વજ્ઞવક્ત્રવરતામરસાઙ્કુલીના
　　પ્રીણાત્  વિશ્રુતયશાઃ શ્રુતદેવતા નઃ ॥ ૧૨॥

ક્લૃપ્તસ્તુતિર્નિબિડભક્તિજડત્વપૃક્તૈ-
　　ર્ગુમ્ફૈર્ગિરામિતિ ગિરાભધિદેવતા સા ।
બાલઽનુકમ્પ્ય ઇતિ રોપયતુ પ્રસાદ-
　　સ્મેરા દૃશં મયિ જિનપ્રભસૂરિવર્ણ્યા ॥ ૧૩॥

॥ ઇતિ શ્રીશારદાસ્તોત્રં (૨) સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD

*Shri Sharadastotram 2*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*